श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रयस्त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयस्त्रिंशः सर्गः ॥

## पुलस्त्येन रावणस्यार्जुनबन्धनतो मोचनम्

रावणग्रहणं तत् तु वायुग्रहणसन्निभम्।
ततः पुलस्त्यः शुश्राव कथितं दिवि दैवतैः॥ **7.33.1** ॥

ततः पुत्रकृतस्नेहात् कम्पमानो महाधृतिः।
माहिष्मतीपतिं द्रष्टुमाजगाम महानृषिः॥ **7.33.2** ॥

स वायुमार्गमास्थाय वायुतुल्यगतिर्द्विजः।
पुरीं माहिष्मतीं प्राप्तो मनःसम्पातविक्रमः॥ **7.33.3** ॥

सोऽमरावतिसङ्काशां हृष्टपुष्टजनावृताम्।
प्रविवेश पुरीं ब्रह्मा इन्द्रस्येवामरावतीम्॥ **7.33.4** ॥

पादचारमिवादित्यं निष्पतन्तं सुदुर्दृशम्।
ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन्॥ **7.33.5** ॥

पुलस्त्य इति विज्ञाय वचनाद्धैहयाधिपः।
शिरस्यञ्जलिमाधाय प्रत्युद्गच्छत् तपस्विनम्॥ **7.33.6** ॥

पुरोहितोऽस्य गृह्यार्घ्यं मधुपर्कं तथैव च।
पुरस्तात् प्रययौ राज्ञः शक्रस्येव बृहस्पतिः॥ **7.33.7** ॥

ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम्।
अर्जुनो दृश्य सम्भ्रान्तो ववन्देन्द्र इवेश्वरम्॥ **7.33.8** ॥

स तस्य मधुपर्कं गां पाद्यमर्घ्यं निवेद्य च।
पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा॥ **7.33.9** ॥

अद्यैवममरावत्या तुल्या माहिष्मती कृता।
अद्याहं तु द्विजेन्द्र त्वां यस्मात् पश्यामि दुर्दृशम्॥ **7.33.10** ॥

अद्य मे कुशलं देव अद्य मे कुशलं व्रतम्।
अद्य मे सफलं जन्म अद्य मे सफलं तपः॥ **7.33.11** ॥

यत् ते देवगणैर्वन्द्यौ वन्देऽहं चरणौ तव।
इदं राज्यमिमे पुत्रा इमे दारा इमे वयम्।
ब्रह्मन् किं कुर्मः किं कार्यमाज्ञापयतु नो भवान्॥ **7.33.12** ॥

तं धर्मेऽग्निषु पुत्रेषु शिवं पृष्ट्वा च पार्थिवम्।
पुलस्त्योवाच राजानं हैहयानां तथार्जुनम्॥ **7.33.13** ॥

नरेन्द्राम्बुजपत्राक्ष पूर्णचन्द्रनिभानन।
अतुलं ते बलं येन दशग्रीवस्त्वया जितः॥ **7.33.14** ॥

भयाद् यस्योपतिष्ठेतां निष्पन्दौ सागरानिलौ।
सोऽयं मृधे त्वया बद्धः पौत्रो मे रणदुर्जयः॥ **7.33.15** ॥

पुत्रकस्य यशः पीतं नाम विश्रावितं त्वया।
मद्वाक्याद् याच्यमानोऽद्य मुञ्च वत्स दशाननम्॥ **7.33.16** ॥

पुलस्त्याज्ञां प्रगृह्योचे न किञ्चन वचोऽर्जुनः।
मुमोच वै पार्थिवेन्द्रो राक्षसेन्द्रं प्रहृष्टवत्॥ **7.33.17** ॥

स तं प्रमुच्य त्रिदशारिमर्जुनः
  प्रपूज्य दिव्याभरणस्रगम्बरैः।
अहिंसकं सख्यमुपेत्य साग्निकं
  प्रणम्य तं ब्रह्मसुतं गृहं ययौ॥ **7.33.18** ॥

पुलस्त्येनापि सन्त्यक्तो राक्षसेन्द्रः प्रतापवान्।
परिष्वक्तः कृतातिथ्यो लज्जमानो विनिर्जितः॥ **7.33.19** ॥

पितामहसुतश्चापि पुलस्त्यो मुनिपुङ्गवः।
मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम ह॥ **7.33.20** ॥

एवं स रावणः प्राप्तः कार्तवीर्यात् प्रधर्षणम्।
पुलस्त्यवचनाच्चापि पुनर्मुक्तो महाबलः॥ **7.33.21** ॥

एवं बलिभ्यो बलिनः सन्ति राघवनन्दन।
नावज्ञा हि परे कार्या य इच्छेच्छ्रेय आत्मनः॥ **7.33.22** ॥

ततः स राजा पिशिताशनानां
  सहस्रबाहोरुपलभ्य मैत्रीम्।
पुनर्नृपाणां कदनं चकार
  चचार सर्वां पृथिवीं च दर्पात्॥ **7.33.23** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रयस्त्रिंशः सर्गः॥